~~२८६~~ ऊं.नं.१६

नं० ५

स्तोत्र

# शिवापराधस्तोत्रम्

६१८/ स्तो. २१४

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

श्रीगणेशायनमः॥ आदौकर्मप्रसंगात्कलयतिकलुषंमातृकुक्षौस्थितंमांतन्मुत्रामे
ध्यमध्येक्कथयतिनितरांजाठरोजातवेदाः॥यद्यद्वातत्रदुःखंव्यथयतिनितरांशक्य
(1) तेकेनवक्तुंक्षंतव्योमेपराधःशिवशिवशिवभोश्रीमहादेवशंभो॥१॥बाल्येदुखा
तिरेकोमल्ललुलितवपुःस्तन्यपानेपिबासानोशक्यश्चेंद्रियेभ्योभवगु
णजनिताजंतवोमांतुदंतिः॥नानारोगादिदुःखाद्रुदनपरिवशःशंक
रंनस्मरामिक्षंतव्योमेपराधःशिव०॥२॥प्रौढोहंयौवनस्थोविष
यविषधरैःपंचभिर्मर्मसंधौदष्टोनष्टोविवेकःसुतजनयुवतिस्वादुसौ
ख्येनिषण्णाः॥शैवचिंताविहीनंममहृदयमहोमानगर्वाधिरूढंक्षंत
व्यो०॥३॥वार्धिक्येचेंद्रियाणांविगतगतमतिश्चातिदेवाधिथापैःपापैरोगै
र्वियोगैर्व्यथितवपुषैःप्रौढहीनंचदीनं॥मिथ्यामोहाभिलाषैर्मतिमम

॥१॥

मनोध्रुर्जल्पे हृद्धे ध्यानश्रुन्यं क्षंतव्यो०॥४॥ नो शक्यं स्मार्तकर्मप्रतिपदगहनेप्रत्यवा
याकुलाख्ये श्रौतेवार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गे सुसारे॥ ज्ञातो धर्मो विचा
व रैश्रवणमननयः कोनिदध्यासितव्यं क्षंतव्यो०॥५॥ स्नात्वा प्रत्यूषकाले स्नपनविधि
(2) विधौनाहृतंगांगतोयंपूजार्थं वा कदाचिद्बहुतरगहनैः खंडबिल्वीदलानि॥ नानी
ता पद्ममाला सरसि विकसिता गंध पुष्पैस्त्वदर्थं क्षंतव्यो०॥६॥ दुग्धैर्मध्वाज्य
युक्तैर्घटशतसहितैः स्नापितं नैव लिंगं नो लिप्तं चंदनाद्यैः कनकविरचितैः पू
जितंनप्रसूनैः॥ धूपैः॥ कर्पूरदीपैर्विविधरससयुतैर्नैव भक्ष्योपहारैः क्षंतव्यो०॥७॥
ध्यात्वा चित्ते शिवाख्यं प्रचुरतर धनं नैव दत्तं द्विजेभ्यो हव्यं ते लक्षसंख्यैर्हुतव
हवदने नार्पितं बीजमंत्रं॥ नो तप्तं गांगातीरे व्रतपरिचरणो रुद्रजाप्यैस्त्व
दर्थं क्षंतव्यो०॥८॥ स्थित्वा स्थाने सरोज्ये प्रणवमयमरुत्कुंभिके सूक्ष्म
मार्गे शांते दांते प्रलीने प्रकटितगहने ज्योतिरूपे पराख्ये॥ लिंगज्ञे ब्र

ग

(2A)

भवाक्येस्तुकर्न्नैतन्नुतं नैव दृष्टं कदाचित्क्षंतव्यो ॥९॥ नग्नो निःसंकशुद्धस्त्रि
गुण विरहितो ध्वस्तमोहांधकारे नासाग्रे न्यस्तदृष्ट्या विदितभवगुते नैव दृष्टः क
दाचित् ॥ उन्मन्यावस्थया त्वां सकलजननुतं शंकरं न स्मरामि क्षंतव्यो मे ॥१०॥
चंद्रोद्भासितशेखरे स्मरहरे गंगाधरे शंकरे सर्पैर्भूषितकंठकर्णविवरे नेत्रोत्थवैश्वा
नरे ॥ दंतित्वक्कृतसुंदरांबरधरे त्रैलोक्यसारे हरे मोक्षार्थं कुरु चित्तवृत्तिमखि
लामन्यस्तु किं कर्मभिः ॥११॥ किं वानेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं किं वा
पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किं ॥ ज्ञात्वैतत्क्षणभंगुरं सपदि रे त्याज्यं मनो
दूरितः स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभं ॥१२॥ आयुर्नश्यति पश्य
तां प्रतिदिनं याति क्षयं यौवनं प्रत्यायांति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ॥ ल
क्ष्मीस्तोयतरंगभंगचपला विद्युच्चलं जीवितं तस्मान्मां शरणागतं शरणद त्वं रक्ष
रक्षाधुना ॥१३॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छंकराचार्यविरचितं शिवा
पराधक्षमास्तोत्रं संपूर्णमस्तु ॥ ॥छ॥ ॥ श्रीभवानीशंकरार्पणमस्तु ॥छ॥ ॥छ॥

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com